मरुद्भ्यो लोकपालेभ्यो विधिवद्विश्वकर्मणे[1] ॥
रात्रिसूक्तं च रौद्रं च पावमानं सुमङ्गलम् ।
जपेरन् पौरुषं सूक्तं पूर्वतो [2]बह्वृचाः पृथक् ॥

‘रात्रिसूक्तं’ “रात्री व्यख्यदायती” इति । ‘रौद्रसूक्तं’ “इमा रुद्राये”त्यादि । ‘पावमानं’ “नृपे”त्यादि(?) । ‘सुमङ्गलं सूक्तं’ “कानिक्रदज्जनुष” मित्यादि । ‘पौरुषं’ “सहस्रशीर्षे”त्यादि ।

शाक्रं रौद्रं च सौम्यं च कौष्माण्डं जातवेदसम् ।
सौरसूक्तं जपेरंस्ते दक्षिणेन यजुर्विदः ॥

‘शाक्रं सूक्तं’ “इन्द्रं वो विश्वतस्परी”त्यनुवाके “हुवे नु शक्र”मिति शक्रलिङ्गकम् । ‘रौद्रं सूक्तं’ “इमा रुद्राय स्थिरधन्वन” इति षडृचः । ‘सौम्यं सूक्तं’ “सोमो धेनु”मिति षडृचः । ‘कौष्माण्डसूक्तं’ “यद्देवा देवहेडनमि”ति चत्वारोऽनुवाकाः । ‘जातवेदसं सूक्तं’ “यस्त्वा हृदा कीरिणे”त्यनुवाकः । ‘सौरसूक्तं’ “सूर्यो देवी”मिति षडृचः । एतानि सूक्तानि तैत्तिरीयाणां प्रसिद्धानि[3] ।

वैराजं पौरुषं सूक्तं सौपर्णं रुद्रसंहितम् ।
शैशवं पञ्चनिधनं गायत्रं ज्येष्ठसाम च ॥

---

[1] हेमा. p. 930

[2] हेमा. p. 930, जुहुयात्

[3] Reproduced verbatim by हेमा. p. 930

वामदेव्यं बृहत् सौम्यं रौरवं सरथन्तरम् ।
गवांव्रतं विकर्णं च रक्षोघ्नं च यशस्तथा ॥
गायन्ति सामगा राजन् पश्चिमद्वारमाश्रिताः ।

‘वैराजं’ “पिबा सोममिन्द्रे”ति प्रसिद्धम् । ‘पौरुषं सूक्तं’ “सहस्रशीर्षे”त्यत्रोत्पन्नम् । ‘सौपर्णानि’ “उद्वेद विश्रुतामघ”मित्यत्र त्रीणि सामानि । ‘रुद्रसंहिता’ “सोमो राजान”मित्यादि प्रसिद्धा । ‘शैशवं’ “उच्चा ते जातमन्धस” इति । ‘पञ्चनिधनं वामदेव्यं’ “कया नश्चित्रे”ति प्रसिद्धम् । ‘गायत्रं’ “तत्सवितुरि”त्यादि । ‘ज्येष्ठसाम’त्रीणि आज्यदोहानि । ‘वामदेव्यं’ ग्रामगेयम् । ‘बृहत्’ “त्वामिद्धि हवामह” इति प्रसिद्धम् । ‘सौम्यं’ “सोमव्रतं सन्ते पयांसी”ति । ‘रौरवं’ “पुनानः सोमे”त्यत्र प्रसिद्धम् । ‘रथन्तरं’ “अभि त्वा शूर नोनुम” इत्यत्र प्रसिद्धम् । ‘गवांव्रतं’ “तेमन्वतप्रथम”मिति द्वे सामनी । ‘विकर्णं’ “विभ्राडि”त्यत्र प्रसिद्धम् । ‘रक्षोघ्नं’ “अग्नेर्युक्तादी”त्यादि । ‘यशः’ “बृहदिन्द्राये” त्यत्र प्रसिद्धम्’[1] ॥

आथर्वणाश्चोत्तरतः शान्तिकं पौष्टिकं तथा ।
जपेरन्मनसा देवमाश्रिता वरुणं प्रभुम् ॥
पूर्वेद्युरभितो रात्रावेवं कृत्वाऽधिवासनम् ।
मृदमादाय[2] कुम्भेषु प्रक्षिपेच्चत्वरात्तथा ॥
रोचनां च ससिद्धार्थान् गन्धान् गुग्गुलमेव च ।

---

[1] Reproduced verbatim by हेमा. p. 931

[2] हेमा. p. 931, मृदमानीय कुण्डेषु

गजाश्वरथवल्मीकसङ्गमह्रदगोकुलात् ॥
स्नपनं तस्य कर्तव्यं पञ्चभङ्गसमन्वितैः ।
पूर्तकर्तुर्महामन्त्रैरेवं कृत्वा विधानतः ॥

'पञ्चभङ्गाः'

अश्वत्थोदुम्बरप्लक्षवटवेतसपल्लवाः[1] ।

एवं क्षपां समुद्वाह्य विधियुक्तेन कर्मणा ॥
ततः प्रभाते विमले सञ्जातेऽथ शतं गवाम् ।
ब्राह्मणेभ्यः प्रदातव्यमष्टषष्ट्यथवा पुनः ॥

पञ्चाशद्वाऽथ षट्त्रिंशत् पञ्चविंशति वा पुनः ।
ततः साम्वत्सरैः प्रोक्ते शुद्धे लग्ने सुशोभने ॥

वेदशब्दैः सगान्धर्वैर्वाद्यैश्च विविधैः शुभैः ।
कनकालङ्कृतां तत्र कृत्वा गामवतारयेत् ॥
सामगाय च सा देया ब्राह्मणाय विशाम्पते ।
पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्विताम् ॥

ततो निक्षिप्य मकरं मत्स्यादीन् तांश्च सर्वशः ।
धृतां चतुर्भिर्विप्रैस्तु वेदवेदाङ्गपारगैः ॥

महानदीजलोपेतां दध्यक्षतविभूषिताम् ।
उत्तराभिमुखो न्युब्जं जलमध्ये तु कारयेत् ॥

आथर्वणेन साम्ना च "पुनर्मा"मित्यृचेन च ।
"आपो हिष्ठे"ति मन्त्रेण क्षिप्त्वाऽऽगत्य च मण्डपम् ॥

---

[1] हेमा. p. 931, चूतस्य पल्लवाः

'आथर्वणं साम' "शन्नो देवीरभिष्टय" इत्यत्र प्रसिद्धमरण्ये गेयम् ।

तथा

पूजयित्वा सदस्यांस्तु बलिं दद्यात् समन्ततः ।
पुनर्दिनानि होतव्यं चत्वारि मुनिसत्तमाः ॥
चतुर्थीकर्म कर्तव्यं देया तत्राऽपि शक्तितः ।
दक्षिणा राजशार्दूल वरुणं संस्मरंस्ततः ॥
कृत्वा तु यज्ञपात्राणि यज्ञोपकरणानि च ।
ऋत्विग्भ्यस्तु समं दत्वा मण्डपं विभजेत् पुनः ॥
हैमपात्रीं[1] च शय्यां च स्थापकाय निवेदयेत् ।
ततः सहस्रं विप्राणामथवाऽष्टशतं तथा ॥
भोजयेच्च यथाशक्त्या पञ्चाशद्वाऽथ विंशतिम् ।
एवमेव पुराणेषु तडागविधिरुच्यते ॥
कूपवापीषु सर्वासु तथा पुष्करिणीषु च ।
एष एव विधिर्दृष्टः प्रतिष्ठासु तथैव च ॥
मन्त्रतस्तु विशेषः स्यात् [2]प्रासादोद्यानभूमिषु ।
अयं[3] त्वशक्तावर्द्धेन विधिर्दृष्टः स्वयंभुवा ॥
स्वल्पेष्वेकाग्निवत् कार्यो वित्तशाठ्यादृते नृभिः[4] ।

---

[1] I. O., हैमपात्रीं and मेध्यां for शय्यां ; the two sets are wrongly joined.

[2] I. O., आरामोद्यान

[3] हेमा. p. 933, अयं च शक्तावर्धेन

[4] I. O., शाठ्यादिवर्जनैः

प्रावृट्काले स्थितं तोयमग्निष्टोमसमं स्मृतम् ॥
शरत्कालस्थितं यत्स्यात् तदुक्तफलदायकम् ।
वाजपेयातिरात्राभ्यां हेमन्तशिशिरस्थितम् ॥
अश्वमेधसमं प्राहुर्वसन्तसमये स्थितम् ।
ग्रीष्मे च यत्स्थितं तोयं राजसूयाद्विशिष्यते ॥

एतान्महाराज विशेषधर्मान्
करोति उर्व्यामथ शुद्धबुद्धिः ।
स याति रुद्रालयमाशु पूतः
कल्पाननेकान् दिवि मोदते च ॥

अनेकलोकान्[1] समहस्तपादान्
भुक्त्वा परार्द्धद्वयमङ्गनाभिः ।
सहैव विष्णोः परमं पदं यत्
प्राप्नोति तद्यागरतेन भूयः[2] ॥

बह्वृचगृह्यपरिशिष्टे[3]

अथाऽतो वारुणविधिं वापीयज्ञं व्याख्यास्यामः । पुण्ये तिथिकरणे शुभे नक्षत्रे प्राचीं दिशमास्थाय प्राक्प्रवणे उदक्प्रवणे वा उदकसमीपेऽग्निमुपसमाधाय वारुणं चरुं श्रपयित्वा, आज्यभागान्तं कृत्वा, चतस्र आज्याहुतीर्जुहुयात् "समुद्रज्येष्ठा" इति प्रत्यृचम् । ततो हविषाऽष्टाहुतीर्जुहुयात् "तत्त्वा यामि ब्रह्मणा वन्दमानः" इति

---

[1] हेमा. p. 933, अनेन लोकांश्च समस्त

[2] *Ibid*, तद्योगबलेन

[3] हेमा. p. 936; उत्सर्गमयूख (*ed*. Gujarathi Press) p. 3

पञ्च । "त्वन्नो अग्ने वरुणस्य विद्वानि"ति द्वे । "इमं मे वरुण श्रुधी"ति च स्विष्टकृतं नवमम् । नव वै प्राणाः प्राणा वै आपः तस्मादापो नवभिर्जुहोति । मार्जनान्ते धेनुमवतारयेत् । अवतीर्यमाणामनुमन्त्रयेत् ।

'इदं सलिलं पवित्रं कुरुष्व
शुद्धाः पूता अमृतास्सन्तु नित्यम् ।
भावयन्तो सर्वतीर्थाभिषिक्तं
लोकाल्लोकं तरते तीर्यते च' ॥

इत्यनेन पुच्छाग्रे यजमानः स्वयं लग्नः आचार्येणाऽन्वारब्ध उत्तीर्य "आपो अस्मान्मातरः शुन्धयन्त्वि"त्यनयाऽपराजितायां दिश्युत्थापयेत् "सूयवसा हि भगवती भवतीह भूया" इति । यदि सा हिङ्करोति "हिङ्कृण्वती वसुमती वसूनामि"ति जपेत् । तां सचेलकण्ठां काञ्चनशृङ्गीं ताम्रपृष्ठीं वृषप्रजां रौप्यखुरां कांस्योपदोहां विप्राय सामगाय दद्यात् इतरां वा । शक्त्या दक्षिणा आचार्याय देया । तत उत्सर्गं कुर्यात् । "देवपितृमनुष्याः प्रीयन्ता"मिति उत्सृजेत् इत्याह शौनकः । यजमानो ब्राह्मणान् भोजयित्वा स्वस्त्ययनं वाचयेत् ।

इति कूपवापीतडागविधिः ॥

अथ द्वारीबन्धः

देवीपुराणे[1]

ब्रह्मोवाच

देव्यः शस्ताः सुरश्रेष्ठ सर्वकामप्रसाधिकाः ।
तासां समुपभोगार्थं जलपात्राणि कारयेत् ॥

द्वारीबन्धादिकाः शक्र [2]कूपशाख्यन्तकाः शुभाः ।
ततः[3] खातं तडागं तु विपाली [4]विश्वकी मता ॥

शोभाढ्या दीर्घिका प्रोक्ता चतुरस्रा तु वापिका ।
कूपाः पादविहीनाश्च सपादास्तोरणान्विताः ॥

संक्रमा बन्धवरणा सरन्ती मातृका मता[5] ।
गिरेरन्तर्गता द्वारी सस्फोटं हरकं तथा ॥

चक्रमर्दः सचलको ह्यर्गला चेति चाऽन्तिमा ।
वज्रनागमधोगामी न सिध्यन्ति कदाचन ॥

हेलात्मा च तथा चक्रं सुखसाध्या प्रकीर्तिता ।
उत्तमाधममध्याश्च स्वल्पबद्धा सुखग्रहा ॥

दैर्घ्योच्चबन्धगाथा तु साऽधमा परिकीर्तिता ।
शतसाहस्रपर्यन्ता द्विदण्डाष्टद्विदण्डिका ॥

---

[1] हेमा. pp 919–924 ff

[2] हेमा. p. 919, पुष्करिण्यन्तकाः

[3] *Ibid*, तलखातं

[4] *Ibid*, पौष्टिकी

[5] *Ibid*, शक्र साबन्धकरणा झिरन्ती झिण्टिका मता

द्वारी श्रेष्ठाऽधमा तात बहुबन्धा च या भवेत् ।
सिकतापङ्कसच्छिद्रां सप्रजां परिवर्जयेत् ॥
शुभाहे दीर्घविस्तारं मित्वा बन्धं समाचरेत् ।
त्रिपञ्चाष्टकपर्यन्तः श्रेष्ठो बन्धः प्रकीर्तितः ॥
शतद्वयं शुभा पाली कराणां सप्तधाऽधमा ।
विस्तारः कथितः शास्त्रे पालीबन्धस्य पण्डितैः ॥

प्राकारकूटनलिकापुटकापृष्ठसञ्चयम् ।
पृष्ठमग्रे[1] भवेद्बन्धमर्द्धचन्द्रं सकम्बलम् ॥
भ्रूजिह्वा ललने शक्रमास्थानं तोयसङ्गमम्[2] ।
पाषाणघटितं बद्धमघटं बिल्वकाष्ठजम् ॥
शिलास्तम्भनिबद्धन्तु पृथुविस्तीर्णसाश्वितम् ।
वज्रसन्धानसंयोगं समं वा दान्तकं परम् ॥
यथाकालसहं विद्वान् कुक्षिघातं तु कारयेत् ।
न मध्यहृदये खातं कम्बले वाऽपि दापयेत् ॥
महादोषकरं तत्तु द्वारीकर्तुर्भयप्रदम् ।
प्रयत्नः कुट्टने कार्यो मृत्तिकाकूर्चनादिके ॥
नलिकासु[3] प्रदातव्यं लोहं मुसलघट्टितम् ।
समाप्तिपर्ययं यावत् उपलान् खातयेन्नृप ॥
अन्यथा न भवेद्गाढा[4] स्रावदोषकरी भवेत् ।
पालीं तस्माद्दृढां कुर्यादग्रपृष्ठां न घट्टिताम् ॥

[1] हेमा. p. 920, पृष्ठमार्गे

[2] *Ibid*, भूमेर्वा चलने शक्र तत्स्थानं तोयसंयमम्

[3] A. S. B., नालिकेरादिदातव्या

[4] I. O., प्रौढा

कूर्मवृषभमत्स्यादिहेमं चाऽऽदौ विनिक्षिपेत् ।
प्रारम्भेऽस्या महापूजा सेनकादिषु[1] कारयेत् ॥
वारुणं नागदेवं तु योगमन्त्रजपं सदा ।
आनिष्पत्ति तु कर्तव्यं अन्यथा भयदं भवेत् ॥
कर्तू राष्ट्रे[2] जले शक्र द्वारी च न दृढा भवेत् ।
दृढार्थं[3] प्रतिरूपाणि तदा लिङ्गं विनायकम् ॥
शक्तिपूर्वाणि कुर्वीत महालक्ष्मीर्यथा पुरे ।
शुभदा भवने लोके [4]नत्वा तोयं शिवं तथा ॥
आरामं तोरणं वापी कूपं वा समहोरगम् ।
द्वारीबन्धेषु कर्तव्यमुत्सर्गं गोप्रदानिकम् ॥
गोसहस्रं शुभं देयं महीं हेम च दक्षिणाम् ।
श्येनकं नागयज्ञं च द्वारीबन्धे सदा शुभम् ॥
चतुस्तोरणसंयुक्तं पताकादिविभूषितम् ।
उत्सर्गं विहितं द्वार्यामन्यथा शतशोकदम्[5] ॥
शकटेन बलिर्देयः [6]पशुघातपुरस्सरम् ।
स्फुरन्तं नागहृदयं मन्त्रं तत्र प्रयोजयेत् ॥
सम्पूर्णं जायते सर्वं न्यूनाधिककृतं च यत् ।

---

[1] I. O., सेनकादिषु ; हेमा. p. 921 has श्येनकादिषु;

[2] हेमा. p. 921, जने for जले

[3] हेमा. p. 921, दृष्टार्थं for दृढार्थं

[4] हेमा. p. 921, तदा तोयं; I. O., नत्वा तोयं Udaipur Ms. has नन्दातोयं

[5] हेमा. p. 921, न शुभोदकम्

[6] हेमा. p. 921, पशुपात

फलं च हयमेधस्य यत्कृतस्य भवेदिह ॥

समग्रं [1]तद्भवेत्तस्य द्वारीबन्धे कृते सति ।
इह कीर्तिः शुभं सर्वं विशत्रुश्च भवेन्नृप ॥

द्वारीबन्धेन कर्तारो नन्दन्ति प्रजया सह ।
तडागं नलकोपेतं परीवाहसमन्वितम् ॥

देवतारामसंयुक्तं सर्वकामप्रदायकम् ।
द्वारीबन्धे तु विस्तीर्ण [2]परीवाहास्तथा शुभाः ॥

अन्यथा न भवेच्छक्र दृढत्वं पालिबन्धने ।
मध्ये पाल्यास्सुविन्यासं जलमार्गं जलावहम् ॥

शैलं पक्केष्टकं वाऽपि कार्यं क्रीडाय भूभृताम् ।
शालीक्षुरोपणे कुर्य्यान्नलकं शोभनं तथा ॥

सोपानपालिका कार्या विस्तीर्णा स्नानभोजने ।
शोभाधिक्येन संयुक्ता ऊर्द्ध्वं कार्या यथाविधि ॥

बन्धपृष्ठे दृढो बन्धः कार्यः कालसहस्तथा ।
एवं पुण्यमवाप्नोति स्थैर्ये कालवशात्कृते ॥

वाजिमेधः क्रतुर्यद्वत्सोऽपि पुण्यप्रदो भवेत् ।
द्वारीबन्धस्तथा तात पुण्यदो जायते नृणाम् ॥

पुण्यात्संसिध्यते तत्र नन्दादीनां निवेशनात् ।
जयन्त्यादितडागानि अष्टौ पापहराणि च ॥

तेषु द्वारी भवेच्छ्रेष्ठा देवारामसमन्विता ।
कूपवापीजलोपेता पुत्रायुःकीर्त्तिदा सदा ॥

---

[1] हेमा. p. 921, लभते

[2] *Ibid*, परिदाहरशुभस्सदा

सा परिग्रहसंस्थानं भूपतेर्नामकल्पिता ।
पुरपत्तनदेवानां सिद्ध्यर्थं जायते शुभा ॥

सरित् सिद्धालयैः शैलैर्या नक्रान्ता[1] वसुन्धरा ।
सौभाग्यं द्वारिबन्धस्य जलवेष्टाष्टकम्बला ॥

पितृदेवमनुष्याणां तज्जलं त्वभिनन्दितम् ।
पावनं जायते शक्र अन्यथा निष्फलं भवेत् ॥

अनुत्सृष्टं तु द्वारीषु[2] अपेयं सलिलं भवेत् ।
तस्माच्चोत्सर्गितं पेयं वर्षासूत्सर्जनं शुभम् ॥

तडागाश्चोत्तरे[3] संस्था ऐशान्यां पूर्वगाऽपि वा ।
दक्षिणे चैव लिङ्गं तु शिवा स्याच्छुभदा सदा ॥

पश्चिमे शुभगा नाम वायव्योत्तरतस्तथा ।
न कुर्युर्याम्ये नैर्ऋत्यामाग्नेय्यां च शुभार्थिना ॥

प्रदक्षिणेन पूर्वस्यां रोपितव्यं सदा शुभम् ।
अन्यथा कलहोद्वेगं मृत्युं वा लभते कृती ॥

तस्माद्राज्यायुःशुभदं पुत्रसन्ततिवर्द्धनम् ।
पश्चिमोत्तरपूर्वेण आरामं जायते कृतम् ॥

द्वारीबन्धं शिवोपेतं शक्तिभिर्नायकैर्युतम् ।
तदा कूपजलारामभूषितं सर्वकामदम् ॥

एवंविधं पुरोपेतं [4]ब्रह्मकुड्यमथाऽन्वितम् ।

---

[1] हेमा. p. 922, विष्णुक्रान्ता

[2] हेमा. p. 922, अनुत्सर्गितद्वारीषु

[3] हेमा. p. 922, तत्पूर्वाचोत्तरे

[4] हेमा. p. 923, ब्रह्मसूर्यान्तकान्वितम्; I. O., ब्रह्मकुड्यमथाऽन्वितम्; Udaipur Ms., ब्रह्मपुर्यामथाऽन्वितम्

कुर्याद्यः सुरशार्दूल स लभेदीप्सितं फलम् ॥
इह कीर्तिं शुभान् पुत्रान् परत्र परमां गतिम् ।
द्वारीबन्धात्फलं ब्रह्मन् हयमेधफलं[1] लभेत् ॥
समस्तपातकोच्छित्तिः कृते भवति देववत् ।
तस्मान्नृपेण कर्तव्यं विधिना द्वारिगं जलम् ॥
समस्तशास्त्रदृष्टेन[2] कर्मणा सफलं भवेत् ।
श्येनकादेस्तथा पूजा नागाङ्कहृदयं जपेत् ॥
द्वारीबन्धस्य सिद्ध्यर्थमन्यथा न भवेत् कृतम् ।
यतः पुण्यैस्तु संसिध्येत् द्वारीबन्धः सुरोत्तम ॥
अतः पुण्यविधिः कार्यो जपहोमव्रतादिकः ।
दर्शौरगौकसं कार्यं शिवस्यादेशतः शुभम् ॥
नागानां द्वारिसिद्ध्यर्थं नन्दाकूपं कृतं भवेत् ।
महापुण्या[3] भवेद्द्वारी किन्तु सन्देहसाधना ॥
कृता विशीर्यते कालात्तस्मात्कार्या सदा दृढा ।
द्वेषं पश्चिमयाम्यस्थं तत्कर्तुर्मृत्युदं भवेत् ॥
जयं पश्चिमपूर्वेण रतिपुत्रधनप्रदम् ।
याम्यसौम्यगतं दण्डं पत्नीधनविनाशनम् ॥
यक्षं वारुणगं भद्रराज्यायुः[4] पुत्रदं बलम्[5] ।
पूर्वोत्तरगतं देयं सुखदं धनदं मतम् ॥

---

[1] हेमा. p. 923, हयमेधसमं भवेत्

[2] *Ibid*, समन्त्रं शास्त्रदृष्टेन

[3] हेमा. p. 923, तर्हि अपुण्या भवेद्द्वारी

[4] *Ibid*, शय्यायुः

[5] हेमा. p. 923, मतं for बलं

पश्चिमे सङ्गतं नन्दं नन्दनं कोशवर्द्धनम्[1] ।
जलवायुगतं हैमं हेमदं च भवेद्धनम् ॥
रक्षोवायुगतं काकानुच्चाटं कुरुते धनम् ।
अग्निवायुगतं[2] दाहं दहनं कीर्तिवर्द्धनम् ॥
ईशदाहगतं[3] पापं धनतापकरं तथा ।
वायुदाहगतं तेजो रत्नहेमगजापहम् ॥
एवं लक्षणमाश्रित्य कर्तव्याऽऽरामवाटिका ।
शुभावहा सदा कर्तू राज्यायुःसुखकीर्तिदा[4] ॥
वैपरीत्ये सदा लोकेऽधनं कर्तुर्भयावहम्[5] ।
नृप राष्ट्रे जले दोषान्न हन्याद्विधिना शुभम् ॥
सरुद्रां कारयेद्वारीं गणनाथसमन्विताम् ।
जयं च विजयं कार्यं सुष्टु कुर्यात् [6]कुलाष्टकम् ॥
नागाख्यं हृदयं जप्त्वा प्रस्फुरत्स्थापने शुभम् ।
श्येनाः शिवादिदेव्यश्च[7] तर्पितव्या जलस्रजैः ॥
वस्त्रैर्नानाविधैर्गन्धैः फलधूपगणादिभिः ।
कार्यो महोत्सवो द्वार्यां पालीबन्धदृढार्थिभिः ॥

---

[1] *Ibid*. p. 924 पश्चिमे संगतं मन्दं धनकोशविवर्धनम् : a variant नन्दनं कोशवर्द्धनं is also noted.

[2] हेमा. p. 924, वारुणिकं

[3] *Ibid*, देशदाहगतं

[4] *Ibid*, सुतवित्तदा

[5] *Ibid*, मदावहम्

[6] हेमा. p. 924, सराष्ट्रकम्

[7] *Ibid*, सेनाविवाहदेव्यश्च तर्पितव्याः पयोव्रतैः

दानं देयं सदा शक्र नृपराष्ट्रसुखावहम् ।
गोदानं भूमिदानं च कन्यादानं सुरोत्तम ॥
द्वारीबन्धे प्रदातव्यं एकं कोटिगुणं भवेत्[1] ।
गोमेधे नरमेधे च हयमेधे तथा मखे ॥
पुण्यं यज्जायते शक्र द्वारीबन्धे ततोऽधिकम् ।
वापीकूपतडागानि देवतायतनानि च ॥
एतानि पूर्तधर्मेषु शुभानि फलदानि च ।
दीनान्धमूकभीरूणां दानं देयं यथाविधि ॥
एकं कोटिगुणं पुण्यं जायते नाऽत्र संशयः ।
एतत्ते कथितं शक्र द्वारीबन्धस्य यत्फलम् ॥
प्रादुर्भावं तु देवीनां क्षेपान्माहात्म्यकीर्तितम् ।
शिवदूतास्तथा सम्यक् प्रादुर्भावं च लक्षणम्[2] ॥
यः शृणोति नरः सम्यक् सर्वपुण्यफलं लभेत् ।
कूपारामतडागादि प्रपाद्यग्निप्रतिश्रयम् ॥
सर्वेशाधिष्ठितं वत्स अनन्तफलदायकम् ।
यः कुर्याद्द्वारिबन्धानां तडागानां शतं तथा ॥
सर्वेश्वरजलं कृत्वा लभेत् पुण्यं ततोऽधिकम् ।
शिवसूर्यहरिब्रह्मसंयुक्तं सर्वकामदम् ॥
आद्या मूर्तिः परा ध्येया व्यापिनी मन्त्रतन्त्रगा ।

---

[1] हेमा. p. 924 has two lines, which are missed by the text:

गजाश्वरत्नदानं च अन्नदानं प्रयत्नतः ।
द्वारीबन्धेषु दातव्यं सर्वं कोटिगुणं भवेत् ॥

[2] I. O., and हेमा. p. 925 have समंगलम् for च लक्षणम्

सर्वेशं सर्वदैवत्यं ब्रह्माद्यैः परिवारितम् ॥
स्थापितं जायते शक्र सर्वाघभयनाशनम् ।

तथा

विजनं नैव कर्तव्यं मठारामविवर्जितम् ।
सर्वेशं विघ्नदं कर्त्तुं नृपलोकभयापदम् ॥

तस्माच्चाऽऽदौ जलं कार्यमारामं वाटिका तथा ।
मठं देवालयं पश्चाद्याम्यरक्षोगतं शुभम् ॥

कूपारामं यथाशस्तं कर्तुर्लोके प्रजायते[1] ।
तथा कुर्यात् सुरश्रेष्ठ यथा शोभा दृढा भवेत् ॥

पूर्वामाश्रित्य कर्तव्यं तस्योत्तरपदेऽपि[2] वा ।
न पूर्वात् व्यत्ययं[3] कुर्यान्मठं देवालयं गृहात् ॥

कृतं भयप्रदं लोके यथा रक्षोग्निगं[4] जलम् ।
वायव्यं चाऽपि देवस्य भयदं भवने कृतम् ॥

कूपं पञ्चकरादूर्ध्वं यावद्भूंशं[5] तदुद्भवम् ।
वापी [6]दण्डद्वयादूर्ध्वं दशवंशा नृपोत्तमैः ॥
कर्तव्या सर्वथोत्तारा द्वित्रिश्चैकपथाऽथवा ।

---

[1] हेमा. p. 915

[2] हेमा. p. 916, उत्तरपथेऽपि

[3] *Ibid*, पूर्वव्यत्ययं

[4] *Ibid*, चाऽग्निभयं

[5] I. O., यावदुग्रं

[6] हेमा. p. 916, दण्डमयात् ; and दशवर्गात् for दशवंशाः

विन्यासं भद्रकं [1]चाऽन्यैर्वृत्ता वाचयता तथा ॥
त्र्यस्त्रा वा चाऽर्द्धचन्द्रा वा धनुषा च शिवाकृती[2] ।
कर्तव्या [3]द्रव्यकारा तु गोपथा सर्वकामदा ॥
वेदाष्टमध्यगोत्सारा करसार्द्धा यथा भवेत् ।
कूपो वा शैलयष्टी वा देया नेमी तथा दृढा ॥
भवने काष्ठपाषाणमृद्धपीठसमुच्छ्रया ।
सुबद्धतोरणोपेता गणनाथगृहान्विता ॥
याऽधो क्षीणा भवेद्वापी नृपादीनां शुभावहा ।
नागयक्षगृहैर्देव्या भूषिता क्रीडनाकुला ॥
वापी भद्रा सुरश्रेष्ठ सर्वकामप्रदा नृणाम् ।
पक्षाश्रिता[4] यथाकान्ता विजया मङ्गला तथा ॥
प्रपायोक्त्री भवेद्वापी नृपादीनां शुभावहा ।
वृत्तायताश्चतुस्रावा वाप्यः साधारणा मताः ॥
शेषाः काम्याधिकारेण कूपो वृत्तः सुखावहः ।
प्रतिपादकरैर्देया उत्साराश्चाऽङ्गुलैः शुभाः ॥
न देवादधिकं कूपं कुर्याच्छक्र कदाचन ।

तथा

सप्त गङ्गा हि वरदा शूलोद्यतकरं परम् ।
याम्ये कल्पतरुर्ब्रह्मा वामतस्तु जनार्दनः ॥

---

1 हेमा. p. 916, राज्ञो वृत्ता वा चायता
2 I. O., धुराकृती
3 हेमा. p. 916, द्रव्यसारेण
4 I. O., भद्रा पद्माश्रिता

सूर्यश्चाऽभ्रस्फुरत्तेजाः पादान्तस्थित ऊर्द्धगः ।
सुरूपाकृतिभागस्थं कृत्वा जलपतिं हरिम् ॥
तदा पापेन सन्त्यक्तो दिवं भोक्ष्यति चाऽमृतम् ।
तच्च रूपं सुरेन्द्राद्या नागा यक्षा ग्रहोरगाः ॥
पूजयन्तो भविष्यन्ति विगतश्च(?)गदा नराः ।
प्रासादमण्डपगृहे मठे चित्रशिलातले ॥
मण्डपे पट्टशालायां सर्वेशं पूजयन्ति ये ।
सारामं तु जलोपेतं मठं [1]भूमिद्वयोच्छ्रितम् ॥
शान्तिधामाग्निव्याख्यानविद्याकोशजपादिभिः ।
युक्तं देवाय दातव्यं सर्वकामप्रदायकम् ॥
महापापवियोगादि शमनं[2] भूमलापहम् ।
राज्यायुःशुभसौभाग्यवर्द्धनं कीर्तिवर्द्धनम् ॥

तथा

विजलं नैव कुर्वीत मठारामविवर्जितम् ।
सर्वेशं विघ्नदं कर्त्तुर्नृपलोकभयप्रदम् ॥

तथा

देवायतनकोटिं यः कुर्याद्धेमाण्डभूषणम् ।
एकं सर्वेश्वरं राम कृतं तस्याऽधिकं फलम् ॥
गङ्गोदकेन यत् पुण्यं स्नापनात् परिकीर्त्तितम् ।
तत्पुण्यं तैर्जलैः स्नाप्य तदैशानगतैर्लभेत् ॥

इति द्वारीबन्धः ॥

---

[1] I. O., भूमित्रयोच्छ्रितम्

[2] I. O., महापापादिरोगादि

२१

अथ वृक्षप्रतिष्ठा

तत्र देवीपुराणे[1]

ब्रह्मोवाच

अनूपे सजले स्थाने पुमान् दैवेऽथ वा जले ।
आरामं रोपयेत् प्राज्ञो विधिदृष्टेन कर्मणा ॥

'अनूपे' अतिस्निग्धे । 'सजले' जलाशयसहिते[2] ।

कालं देशं तथा पात्रं बीजं बीजक्रियाविधिः ।
तथा फलमसंसृष्टमेवमारोपितं भवेत् ॥
फलपुष्पविशुद्धस्य विशुद्धं सर्वसंस्कृतम् ।
धर्मकामार्थमोक्षादिसाधने हन्यतेऽन्यथा ॥
विधिव्यत्ययबीजादिभूषिते भूपरिग्रहे ।
कूलादिभिः सुरश्रेष्ठ यजमानो विनश्यति ॥

'पात्रं' बीजवापे य आचार्यः। 'बीजक्रियाविधिः' अङ्कुरजननसमर्थबीजकरणप्रकारः। 'विधिव्यत्ययः' विधेरन्यथाकरणम्। 'कूलादिभिः' नदीकूलादिभिः[3] ।

---

[1] हेमा. p. 950

[2] *Ibid*, explanation reproduced.

[3] Reproduced by हेमा. p. 950, with the exception of the last clause.

आरामं सहकाराद्यैर्न शुद्धं कारयेत् क्वचित् ।
चिताज्वलनसंलग्ने चितिवल्मीकदूषिते ॥
सहकारवनं कृत्वा याति कर्ता यमालयम् ।
गृहात् पुरोऽथवा तात स्थिते संरोपिते तथा ॥
प्रतिपाद्यं[1] भवेत्तत्र छिन्द्याद्वा हितमिच्छता ।
अश्वत्थवटप्लक्षादि औदुम्बर्यो विदिक्स्थताः ॥
जगतो भयदा यस्मात्तस्मात्तांश्छेदयेत्पुरे[2] ।
रोपयेद्बिल्ववीराम्रकपित्थकपिलार्जुनान् ॥
दाडिमीं बीजपूरं च उदगाद्या द्रुमाः पुरे[3] ।
प्लक्षाः प्राच्यां सदा रोप्याः [4]शाकासनसधन्वनाः ॥
कदम्बो वायवे तालो बिल्वाशोकौ तु सर्वगौ ।
मयन्दीं माधवीं रम्भाः क्रीडास्थाने निवेशयेत् ॥

'वीरो' भल्लातकवृक्षः । 'कपिला' शिंशपा । 'कपित्थः' प्रसिद्धः दाडिमी च । 'असनो' बीजकः । 'वायव्ये' वायुदिग्भागे[5] ।

जातीनेपालिकाकुन्दतगरागन्धमल्लिकाः ।
शुभाय कथितास्तात व्यत्ययाद्भयदा यतः ॥
पूर्वेण सुसमारामं प्रोक्तं चोत्तरतोऽथवा ।

---

[1] I. O., and हेमा. p. 951, प्रतिपक्षम्

[2] हेमा. p. 915, मुने for पुरे

[3] *Ibid*, परे

[4] A. S. B., शाकटाध्वनधन्वनाः; हेमा. p. 915, सकासनसधन्वताः

[5] Reproduced by हेमा. p. 951

पश्चिमे धनदं प्रोक्तं वायव्यां कीर्तिवर्द्धनम् ॥
न कुर्युर्याम्यनैर्ऋत्ये आग्नेये च शुभार्थिनः ।
अन्यथा कलहोद्वेगं मृत्युं वा लभते कृती ॥
तस्माद्राज्यायुःशुभदं पुत्रसन्ततिवर्द्धनम् ।
पश्चिमोत्तरपूर्वेण आरामं जायते शुभम्[1] ॥
अथवाऽऽरामजान् दोषान् [2]चामुण्डी शमयेत् कृतान् ।
महाभयं महालक्ष्मीर्ग्रहकृत्यां तथोत्थिताम् ॥

'ग्रहकृत्यां' ग्रहपीडाम् ।

पुष्पपत्रफलानां च रजोवेणुसमाः समाः ।
कर्त्ता देवसभावासं विधौ यात्यविधावधः ॥

इत्यारामप्रतिष्ठा ॥

अथ वृक्षरोपणविधिः

तथा[3]

एवं यथोदितां भूमिं शुद्धां प्लवसमाहिताम् ।
परिगृह्य यजेद्देवं[4] धनपालं शिखिध्वजम् ॥
सोमं च नागराजं च ततः कुर्यात्परिग्रहम् ।

---

[1] I. O., and हेमा. p. 951, कृतम्

[2] A. S. B., चामुण्डा शमयेत्तदा

[3] हेमा. p. 952 (from देवीपुराण)

[4] *Ibid*, यथा देव वनमालं

यद्बीजं मन्त्ररहितं गर्भाधानादिवर्जितम् ॥
वापितं सहकारादि यद्बीजं मन्त्रवर्जितम् ।
तज्जातं वाऽपकाराय तथा जायेत वैकृतम् ॥
'शङ्करायेʼति मन्त्रेण 'इन्द्र एहीʼति मन्त्रितम्[1] ।
त्र्यम्बकेन तु राजेन्द्र बीजं भवति शोभनम् ॥
अविधौ कूपवाप्यादिखननोत्सरणं च यत् ।
कुर्वन्ति सहकारादिरोपणं च नराधमाः ॥
फलं तेषां लभन्ते न इह चाऽन्ते ह्यधोगतिः ।
ये शूद्राः[2] शूद्रविधिना कुर्वन्ति च न रोपणम् ॥
ते आत्मनृपलोकानां महासंशयकारकाः ।
कूपारामतडागादि प्रपावापीप्रतिश्रयम् ॥
सर्वेशाधिष्ठितं वत्स ह्यनन्तफलदायकम् ।
वृक्षान् पञ्च समारोप्य शिवधाम प्रपद्यते ॥
ये च पापा दुराचाराः श्रीतरुच्छेदकारिणः ।
तेऽप्यवीच्यादिनरके पच्यन्ते ब्रह्मणो दिनम् ॥
मृतास्ते जीवमानास्तु ब्रह्मघ्नाः कीर्तिता भुवि ।
तस्मिन् देशे भयं नित्यं राजानो न चिरायुषः ॥
न च नन्दत्ययं लोको यत्र श्रीवृक्षच्छेदनम् ॥

नन्दिपुराणे[3]

क्रीडारामं तु यः कुर्यादुद्यानं पुष्पसङ्कुलम् ।

---

[1] हेमा. p. 952, इत्थं तु पञ्चमन्त्रवित्

[2] हेमा. p. 952, येऽशुद्धाः शुद्धविधिना

[3] हेमा. p. 947

तोयाश्रयसमायुक्तं गुप्तं फलसमृद्धिमत् ॥
स गच्छेच्छङ्करपुरं वसेत्तत्र युगत्रयम् ।
मार्गे वृक्षन्तु यो दद्यात्छायाविटपसङ्कुलम्[1] ॥
स कल्पतरुखण्डेषु[2] महेन्द्रोद्यानवेश्मसु ।
विनोद्यन्तेऽप्सरोबृन्दैर्देववच्च युगाद्युगम्[3] ॥
फलवृक्षं तु यो दद्याद्धर्ममुद्दिश्य मानवः ।
स सर्वकामतृप्तात्मा गच्छेत्त्वरुणमन्दिरम् ॥

स्कन्दपुराणे[4]

यस्तु वृक्षं प्रकुरुते छायापुष्पफलोपगम् ।
पथि [5]दद्यान्नरः सोऽपि सन्तारयति वै पितॄन् ॥
तथैव दद्याद्विप्रेभ्यो निष्क्रीणाति च तत्पुनः ।
यावत्पुष्पाणि च फलान्युपभुञ्जन्ति देहिनः ॥
तावद्युगसहस्राणि सन्तारयति वै पितॄन् ॥

महाभारते[6]

स्थावराणां च भूतानां जातयः[7] षट् प्रकीर्तिताः ।
वृक्षगुल्मलतावल्यस्त्वक्सारास्तृणजातयः ॥

[1] हेमा. p. 940
[2] *Ibid*, p. 941, सकुल्यास्तरुखण्डेषु
[3] *Ibid*, युगार्बुदम्
[4] हेमा. p. 940
[5] हेमा. p. 940, दिव्ये नरः पापात्
[6] हेमा. p. 937
[7] हेमाद्रि has जातयः; Udaipur Ms. reads जायते

एतास्तु जात्या वृक्षाणां तथाऽऽरोपे गुणास्त्विमे ।
कीर्तिश्च मानुषे लोके प्रेत्य चैव शुभं फलम् ॥

अतीतानागतौ चोभौ पितृवंशौ च भावयेत् ।
तारयेद्वृक्षरोपी च तस्माद् वृक्षान् प्ररोपयेत्[1] ॥

मत्स्यपुराणे[2]

सूत उवाच

पादपानां विधिं वक्ष्ये तथैवोद्यानभूमिषु ।
तडागविधिवत् सर्वमासाद्य जगतीश्वरः ॥

ऋत्विङ्मण्डपसम्भारमाचार्यश्चाऽपि तादृशः ।
पूजयेद्ब्राह्मणांस्तद्वत् हेमवस्त्रानुलेपनैः[3] ॥

सर्वौषध्युदकैः सिक्तान् पिष्टालक्तविभूषितान् ।
वृक्षान् माल्यैरलङ्कृत्य वासोभिरभिवेष्टयेत् ॥

सूच्या सौवर्णया कार्यं सर्वेषां कर्णवेधनम् ।
अञ्जनं चाऽपि दातव्यं तद्वद्धेमशलाकया ॥

फलानि सप्त चाऽष्टौ वा कालधौतानि कारयेत् ।
प्रत्येकं सर्ववृक्षाणां वेद्यां तान् न्यवेशयेत् ॥

धूपोऽत्र गुग्गुलुः श्रेष्ठः ताम्रापात्रैरलङ्कृतान् ।
सप्त धान्यान् तिलान् कृत्वा वस्त्रगन्धानुलेपनैः ॥

---

[1] हेमा. p. 937 has four further ślokas from महाभारत here.

[2] हेमा. p. 953

[3] Udaipur Ms. has a big gap here, which is filled by I. O., A. S. B. and Hemādri.

कुम्भान् सर्वेषु वृक्षेषु स्थापयित्वा नरेश्वरः ।
सहिरण्यांस्त्वशेषांस्तान् कृत्वा बलिनिवेदनम् ॥

स यावल्लोकपालानां[1] इन्द्रादीनां विधानतः ।
वनस्पतेश्च विद्वद्भिर्होमः कार्यो द्विजातिभिः ॥

ततः शुक्लाम्बरधरः सौवर्णकृतभूषणः ।
सकांस्यदोहां सौवर्णशृङ्गाभ्यामतिशालिनीम् ॥

पयस्विनीं वृक्षमध्यात् उत्सृजेत्तामुदङ्मुखीम् ।
ततोऽभिषेकमन्त्रेण वाद्यमङ्गलगीतकैः ॥

ऋग्यजुःसाममन्त्रैश्च वारुणैरभितस्तथा ।
तैरेव कुम्भैः स्नपनं कुर्युर्ब्राह्मणपुङ्गवाः ॥

स्नातः शुक्लाम्बरधरो यजमानोऽपि पूजयेत् ।
गोभिर्विभवतः सर्वान् ऋत्विजस्तान् समाहितः ॥

हेमसूत्रैः सकटकैरङ्गुलीयैः पवित्रकैः ।
वासोभिः शयनीयैश्च तथा प्रस्तरपादुकैः ॥

क्षीराभिषेचनं दद्युर्यावद्दिनचतुष्टयम् ।
होमश्च सर्पिषा कार्यो यवैः कृष्णतिलैस्तथा ॥

पलाशसमिधश्शस्ताः चतुर्थेऽह्नि तथोत्सवः ।
दक्षिणा च पुनस्तद्वत् देया तत्राऽपि शक्तितः ॥

यद्यदिष्टतमं किञ्चित् तत्तत् कुर्यादमत्सरः ।
आचार्यं द्विगुणं दत्वा प्रणिपत्य विवर्जयेत् ॥

अनेन विधिना यस्तु कुर्यात् ब्रह्मोत्सवं बुधः ।
सर्वान् कामानवाप्नोति पदं चाऽऽनन्त्यमश्नुते ॥

---

[1] हेमा. p. 953, यथावल्लोकपालानां

यश्चैकमपि राजेन्द्र वृक्षं संस्थापयेन्नरः ।
सोऽपि स्वर्गे वसेद्राजन् यावदिन्द्रायुतत्रयम् ॥
भूतांश्च भव्यान् मनुजान् तारयेद्रोमसम्मितान् ।
परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभाम् ॥

पद्मपुराणे[1]

अपुत्रस्य च पुत्रत्वं पादपा इह कुर्वते ।
यच्छन्ति रोपकेभ्यस्ते सत्तीर्थे[2] तर्पणादिकम् ॥
यत्नेनाऽपि च राजेन्द्र पिप्पलारोपणं कुरु ।
स तु पुत्रसहस्राणां एक एव करिष्यति ॥

'पुत्रसहस्राणां' कर्त्तव्यमिति शेषः[3] ।

धनी चाऽश्वत्थवृक्षेण ह्यशोकः शोकनाशकः ।
प्लक्षो यज्ञप्रदः प्रोक्तः चिञ्चा चाऽऽयुःप्रदा स्मृता ॥
जम्बुकी कन्यदा प्रोक्ता भार्यादा दाडिमी तथा ।
अरणू[4] रोगनाशाय पलाशो ब्रह्मदस्तथा ॥
प्रेतत्वं जायते पुंसो रोपयेद्यो विभीतकम् ।
अङ्कोले कुलवृद्धिः स्यात् खदिरे चाऽप्यरोगता ॥
निम्बप्ररोपको यस्तु तस्य तुष्टो दिवाकरः ।
श्रीवृक्षे शङ्करो देवः पाटलायां तु पार्वती ॥

---

[1] हेमा. p. 938

[2] हेमा. p. 938 explains : सत्तीर्थे पुत्रकृतं तर्पणादि तृप्त्यादिजन्यं फलं रोपकस्य प्रयच्छन्ति इत्यर्थः ।

[3] Reproduced by हेमा. p. 938

[4] हेमा. p. 938, अरलू

शिंशपायामप्सरसः कुन्दे गन्धर्वसत्तमाः ।
तिन्तिलीकं दासवर्गः वकुलो दस्युदः तथा ॥

'श्रीवृक्षो' बिल्वः । 'तिन्तिलकः' अम्लवृक्षः ।

पुण्यस्त्रीदायकश्चैव चन्दनः पनसस्तथा ।
सौभाग्यदः चम्पकश्च करीरः पारदारिकः ॥
अपत्यनाशदस्तालो नादेयः कुलवर्द्धनः ।
बहुभार्या नारिकेली द्राक्षा सर्वाङ्गसुन्दरी ॥
रतिप्रदा तथा केली मोचकी शत्रुनाशिनी ॥

'मोचकी' शाल्मलिः ।

इत्यादयः तथाऽन्ये च ये नोक्तास्तेऽपि दायकाः ।
प्रतिष्ठान्ते गमिष्यन्ति ये नरा वृक्षदायकाः ॥

नन्दिपुराणे[1]

तरुपुत्रं तु यः कुर्याद्विधिवद्ब्रह्मसन्निधौ ।
स महापातकैर्मुक्तः समुद्धृत्य कुलत्रयम् ॥
नरकेभ्यो नरो याति प्रजापतिपुरं शुभम् ॥

स्कन्दपुराणे[2]

महादेवो महादेवीं इदं वचनमब्रवीत् ।
शृणुष्व येन विधिना गृह्यतेऽवनिजः सुतः ॥

'अवनिजो' वृक्षः ।

---

[1] हेमा. p. 955

[2] *Ibid* ; हेमा. supplies the first five lines of the passage

सुपुत्रार्थं भूमिरुहं ग्रहीष्यामीति पार्वति ।
सोपवासा भवेन्नारी शुचिवृत्ता शुचिव्रता ॥
ततश्चैव सहस्रांशावस्तशृङ्गगते रवौ ।
विप्रानामन्त्रयेद्रात्रौ पावनान् वेदवादिनः ॥
विप्रानामन्त्रयित्वा तु शुचिवस्त्रा शुचिव्रता ।
शयीत सनमस्कारा सदर्भा भूमिमाश्रिता ॥
गमयित्वा तथा रात्रिं सवितर्युदितेऽपि च ।
भक्ष्यभोज्यं समादाय व्रजेद्यत्र भवेत्तरुः ॥
ततस्तं स्नापयित्वा तु सातपत्रं सभूषणम् ।
तं तरुं तरुणीकृत्य ततश्छायानुगामिनम् ॥
यथोपपन्नमन्नाद्यं भोजयित्वा द्विजोत्तमान् ।
पुण्याहं कारयित्वा तु ऋत्विजाऽप्यथवाऽऽत्मना ॥
तृप्तानां ब्राह्मणानां वै [1]तद्वेलाकृतमात्मनः ।
निवेद्य कृतमुद्दिश्य सद्भावेन परेण हि ॥
अपुत्राऽहं हि भगवन् पुत्रप्रकृतकं[2] तरुम् ।
ग्रहीष्यामि ममाऽनुज्ञां कर्त्तुमर्हथ सत्तमाः ॥

'पुत्रप्रकृतकः' पुत्रसदृशः ।

ततस्तैरप्यनुज्ञातं तं तरुं तरुणायुषि ।
भूमिदेवसमक्षं वै गृह्णीयात्तनयं प्रियम् ॥

---

[1] हेमा. p. 956, चैतत्ते कृत्यमात्मनः

[2] *Ibid*, पुत्रप्रतिकृतिं

'तरुणायुषि' वर्तमानं इति शेषः। 'भूमिदेवसमक्षं' ब्राह्मणाग्रतः'[1] ।

गृहीतो विधिनाऽनेन शुभभूमिरुहात्मजः[2] ।
शुभे सुखाय भवति विपरीतेन दुःखदः ॥
न पुत्राणां शतं वाऽपि पीनश्रोणिपयोधरे ।
एकोऽपि भूरुहः श्रेष्ठः पुत्रत्वे कल्पितः सुतः ॥

मत्स्यपुराणे[3]

दशकूपसमा वापी दशवापीसमो ह्रदः ।
दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः ॥

इति वृक्षरोपणविधिः ॥

---

[1] Reproduced by हेमा. p. 956

[2] In हेमा. p. 956 two lines are supplied :
अनेन विधिना यस्तु गृहीततरुपुत्रकम् ।
पितॄणां निरयस्थानां मधुधारां स वर्षति ॥

[3] हेमा. p. 559

२२

अथाऽऽश्रयदानम्

तत्र कालिकापुराणे[1]

शङ्करात् परमं नाऽन्यदतस्तस्मै विकल्पयेत् ।
यतीनामाश्रयं[2] दद्यात् कृत्वा पक्वेष्टकामयम् ॥

'विकल्पः' सङ्कल्पः[3] ।

सुशीलं चारुनिर्माणं परिवारसमन्वितम् ।
व्याख्यामण्डपसंयुक्तमासनैर्विविधैर्युतम् ॥
पुष्पोद्यानसमायुक्तं सोदकं शङ्करालये ।
ग्रामे दीपेन्धनाद्यर्थं प्रेष्याणां चैव वोत्तमे ॥
कौपीनोपानहाद्यर्थमाश्रयेऽपि नियोजयेत् ।
ततोऽभ्यर्च्य यतीन् भक्त्या भोजयित्वा विशेषतः ॥
वस्त्रैश्चैव प्रपूज्येशं शक्त्या तेभ्यो निवेदयेत् ।
अनेनाऽऽश्रयदानेन सर्वकामयुतो नरः[4] ॥

---

[1] हेमा. p. 629

[2] हेमा. and I. O., वाऽपि

[3] Reproduced by हेमा. p. 629

[4] Omission here : see हेमा. p. 629
प्रीयतां स महादेवः चन्द्रमौलिर्महेश्वरः ।
इत्युक्त्वा पुण्यदिवसे दत्वा चैवाऽत्र दक्षिणाम् ॥

भुक्त्वा चाऽमरलोकानां भोगान् गच्छेत्तदालयम् ॥

'तदालयं' शङ्करालयम् ।

इत्याश्रयदानम् ॥

अथ प्रतिश्रयदानम्

तत्र देवीपुराणे[1]

शक्र उवाच

पुरस्य पश्चिमे भागे दक्षिणे चोत्तरेऽथवा ।
पूर्वे वा मध्यतो वाऽपि ये कुर्वन्ति प्रतिश्रयम् ॥

देवतास्तत्र कास्स्थाप्याः का न स्थाप्या द्विजोत्तम ।
दिवि भागगतां ब्रूहि स भवेद्येन शान्तिदः ॥

ब्रह्मोवाच

दक्षिणोत्तरपूर्वेण पश्चिमेन सुरेश्वर ।
अथ मध्यगतः शक्रः कार्योऽयं तत्प्रतिश्रयः ॥

यत्र श्रान्ताश्च[2] खिन्नाश्च विश्राम्यन्ति द्विजातयः ।
प्रतिश्रयस्य कर्त्तारः स्वर्गे तिष्ठन्ति ते चिरम् ॥

तस्मात्प्रतिश्रयः कार्यो दृष्टादृष्टफलार्थिभिः ।
देवताधिष्ठितः शक्रः सर्वसौख्यप्रदो भवेत् ॥

---

[1] हेमा. p. 636

[2] Udaipur Ms. reads शान्ताश्च

देवतानां त्रयं प्रोक्तं चतुर्थी नोपपद्यते ।
महिषघ्नीं तथा यक्षं नायकं तत्र कारयेत् ॥

महिषघ्नी भवेन्मध्ये ज्येष्ठस्थाने च नाऽन्यथा ।
वामतो नायकः कार्यो दक्षिणे यक्षराट् तथा ॥

अथवा दिग्गताः कार्यास्तत्राऽपि कथयामि ते ।
यद्द्वारं सम्मुखं तस्य देवीं तत्र प्रतिष्ठयेत् ॥

नक्षत्रनायकं कार्यं द्वाराभ्यां मध्यतः स्थिताः ।
एवं कृते फलं यत्तु वक्तुं तत् केन शक्यते ॥

केवलं फलमेतस्य सुखं राज्यं यशः श्रियः ॥

इति श्रीभट्टहृदयधरात्मजमहासान्धिविग्रहिकभट्टश्रीलक्ष्मीधरविरचिते कृत्यकल्पतरौ
दानकाण्डं सम्पूर्णम् ॥

॥ श्रीरस्तु ॥

---

* I. O. has the following at the end :

सर्वेषां मौलिरत्नानां भट्टाचार्यमहात्मनाम् ।
एतद्विद्यानिवासानां दानकाण्डाख्यपुस्तकम् ॥
व्योमेन्दुशरशीतांशुमितशाकोर्जशेषतः ।
शूद्रेण कविचन्द्रेण विलिख्य परिहारितम् ॥

शकाब्दः [1510]

APPENDIX A

Readings of the Panjab University Ms. (No. 8162.)

P. 4, l. 1, begins fol. 2 ; l. 3, येन सत्वोपकाराय for यन्न स० ; l. 7, धनं उत्सृज्य for स्वधनं ; l. 10, यत्कृतार्थो for यः कृतार्थः ; l. 13, लुब्धानु for लुब्धा न ; l. 15, उक्त्वा चैव for दृष्ट्वा चैव.

P. 5, l. 4, प्रतिपादनम् for प्रतिपादितम् ; l. 5, विद्यते for वक्ष्यते ; l. 13, अनपेक्ष्य for अनवेक्ष्य ; l. 15, अपेक्ष्यैव for अवेक्ष्यैव ; l. 16, आहुरैहिकं फलहेतुकम् for इहैकफलहेतुकम् ; l. 17, स्त्रीपानमृगयाक्षाणां for स्त्रीयानमृगयाक्षाणाम्.

P. 6, l. 1, यार्थिभ्यः प्रयाचितः for योषिद्भ्यो यत्प्रदीयते ; l. 2, प्रदीयते चेत्तद्दानं ; l. 6, दीयते अपकर्तृभ्यः.

P. 7, l. 8, पिशुनभ्रूणहन्तृभ्यां for पिशुनभ्रूणहन्तृभ्यः ; l. 11, यद्दत्तं for यद्दानं ; l. 12, तत्तु for तेन ; l. 16, वैदिको दानमाग्नेयं for वैदिको दानमार्गोऽयं ; l. 17, कूपारामतडागादि for प्रपारामतडागादि.

P. 8, l. 2, यदप्यते for यदिज्यते ; l. 3, काम्यमित्यभिधीयते for काममित्यभिधीयते ; l. 4, अर्थापेक्षमिति स्मृतम् for अन्वापेक्षमिति स्मृतौ ; l. 7, अधमानि तु for अधमनीति ; l. 7, मितुः for विदुः ; l. 8, हस्तिनः for दन्तिनः ; l. 14, बहुत्वादर्थजातीनां for बहुत्वादनुजातानां ; l. 16, अधीतं वा for अधीतं च.

P. 9, l. 4, मुक्तदोषाद्विवर्जितम् for मुक्तदोषैः विवर्जितम् ; after l. 4, adds कामधेनुवद्दानं फलति आत्मेप्सितं फलम् ; l. 8, विशिष्टो ह्यन्नदात्परः for विशिष्टो नाऽन्नदात्परः ; l. 9, पृथिवीमपि

for वसुधामपि ; l. 10, न काञ्चिद्गतिमाप्नुयात् for न किञ्चित् गतिमाप्नुयात् ; l. 11, शाकमुष्टिं वा श्रद्धाभक्तिसमुद्यता for श्रद्धाभक्तिसमन्वितम् ; l. 14, निमित्तत्वेन for तत्त्वेन ; l. 15, न्यायार्जितमित्यर्थः for न्यायार्जितमित्यन्यः ; l. 17, inserts 'परिभोगः' before परिभोगसाधनम्.

P. 10, l. 1, पुरातनमिति for धरातलमिति ; l. 2, adds हस्त्यश्वादि between उत्तममपि and जीर्णताम् ; l. 3, adds रक्षादिप्रयोजन between वृथारक्षा and व्यतिरेकेण ; l. 4, प्रसूयते अस्मिन्निति प्रसवः for प्रसूयते अनेन इति प्रसवः ; l. 10, याचिते नानुसूयया for याचते चाऽनुसूयया ; l. 13, adds तदैष्टिकम् after दक्षिणादि ; l. 13, omit च.

P. 11, l. 1, सुविशेषतः for सविशेषतः ; l. 2, श्रद्धापूतन्तु शक्तितः for श्रद्धापूतेन शक्तितः ; l. 3, adds मनुः before the line ; l. 8, स्मृतम् for विदुः ; l. 9, स्मृतम् for विदुः ; l. 10, असंस्कृतं for असत्कृतं ; l. 14, प्रतिश्रुत्य for प्रतिज्ञातं ; l. 16, वर्त्तमानांस्तु सप्ततम् for वर्त्तमानांश्च सप्त च ; l. 18, दत्तस्य हरणेन च for दत्तस्याऽऽच्छेदनेन च ; l. 19, तत्पुण्यं विप्रणश्यति for तत्सर्वं तस्य नश्यति.

P. 12, l. 1, adds तथा before आज्ञां कृत्वा ; l. 2, सन्तापको for सन्तप्यते ; l. 4, कृशवृत्तिनम् for कृशवृत्तिकम् ; l. 10, उभावव्रतिकावेतौ for उभावव्रतिनावेतौ ; l. 17, योऽर्चितं for योऽर्चितः.

P. 13, l. 12, प्रदीयते for प्रयच्छति.

P. 14, l. 4, प्रतिगृह्णीत for प्रतिगृह्णीयात् ; l. 5, देशतः वाराणस्यादौ for देशतः प्रयागादौ ; l. 10, तस्मादप्यद्भिः for तस्मादद्भिः.

P. 15, l. 2, धर्मेषु for धर्मसु ; l. 9, वनौकसम् for वनौकसाम् ; l. 11, स एव परमो धर्मो योगिनामात्मदर्शनम् for यतीनां परमो धर्मो यद्योगेनाऽऽत्मदर्शनम्.

P. 16, l 1, तत्र बृहस्पतिः for बृहस्पतिः ; l. 10, भरणाधिकम् for भरणादिकम् ; l. 11, अदेयं स्यादतोऽन्यथा for न देयं स्यात्तोऽन्यथा ; l. 13, स्वकुटुम्बाविरोधेन for कुटुम्बस्याऽविरोधेन.

P. 17, l. 6, प्रायश्चित्तीयते नरः for प्रायश्चित्तीयते हि सः ; l. 8, ग्रहस्वामिनोऽदर्शयित्वा for ग्रहस्वामिने दर्शयित्वा ; l. 12, ग्रहस्वामिसमक्षद्रव्यस्थापनम् for ग्रहस्वामिनः समक्षं द्रव्यस्थापनम् .

P. 18, l. 3, omitted ; l. 4, words in quotations omitted.

P. 19, l. 1, अवतिष्ठति for अवतिष्ठते ; l. 5, नावज्ञया for नावज्ञाय ; l. 9, आदयं for अदेयं ; l. 10, वेदविक्रयलब्धमेतदिति यन्निर्दिश्यते व्यपदिश्यते तत्तथा for the sentence in the text. l. 11, interpolates धनं between आर्जितं and स्त्रीव्यापार .

P. 20, l. 3, भवति for न भजते ; l. 10, तिलान् मधु for तिलान् दधि ; l. 11, तेषामन्नं निवेदयेत् for तेषामन्यन्निवेदयेत् ; l 13, तेषां सर्वान्त्रसांश्चापि for तथा सर्वानिमांश्चापि.

P. 21, l. 3, गृहं for गेहं ; l. 4, विभक्त for विविक्त; l. 11, जीर्णा निमोकनिर्मुक्तः for जीर्णो निर्मोकनिर्मुक्तः ; l. 14, सहस्रसः for सहस्रशः.

P. 22, l. 3, स्नापनं सर्वदेवानां for माल्यप्रदानां देवानां ; l. 4, द्विजोच्छिष्टापसारणम् for द्विजोच्छिष्टापकर्षणम् ; l. 7, गण्डूयनं for कण्डूयनं ; अभिनन्दने for अभिवन्दने ; l. 13, तर्हि for तदा ; l. 15, परिददाति for ददाति ; l. 16, omits यच्च before स्मयदानम्.

P. 23, l. 2, अवजानीते for अवज्ञायते ; l. 4, अध्रुवमफलं भवत्यल्पफलं वा तद्योदानं for अध्रुवफलं वा ; l. 5, omits तदादानम् ; l. 14, नरकं for निरयम्.

P. 24, l. 1, अस्खलितं यदि for स्वर्वलितं ; l. 10, यो ब्रूयाद्द्रव्यमग्नौ for यः कुर्याद्द्रव्यमग्नौ.

P. 25, l. 6, विप्रहीनस्य for विप्रहीणस्य ; l. 8, हरेद्यो वै for हरते यो वै ; l. 13, ब्रह्मते for ब्रह्मगते.

P. 26, l. 1, अथ पात्रापात्रलक्षणम् for अथ पात्राणां लक्षणम् ; l. 14, योनिमित्रं for योनिमन्तम्.

P. 27, l. 13, ध्यानविच्च यः for ध्यानवित्तमः ; l. 15, सुव्रताश्च for सुवृत्ताश्च ; l. 16, ध्यानयुक्ताः for शान्तिमन्तः.

P. 28, l. 4, वेदेन्धनसमृद्धेषु for वेदेषु च समिद्धेषु ; l. 4, विप्रमुखाग्निषु for विप्रमुखादिषु ; l. 5, किल्बिषादपि for किं द्विषादपि ; l. 7, वै for च ; l. 8, तं पात्रं for सत्पात्रं ; l. 15, शुभकारकम् for शुभकर्मणि.

P. 29, l. 5, शातातपो दानव्यासश्च प्रथमे for शातातपो दानवर्षप्रथमे ; l. 6, सुभुक्तं for प्रभुक्तं ; l. 7, न तु मूर्खं for अनन्तवर्षं ; l. 10, दानव्यासः for दाने व्यासः ; l. 11, यत्किचित् for एकोऽपि.

P. 30, l. 3, स्वदारनिरतो for स्वाध्यायनिरतः ; l. 6, विन्दति for वीक्षते ; l. 9, निवृत्तो for निवृत्तं ; l. 15, ततः परम् for ततः परः.

P. 31, l. 4, निरतः for निर्वृतः ; l. 5, यः for वा ; l. 7, वेदवेदार्थतत्वज्ञः for वेदवेदाङ्गतत्वज्ञः ; l. 8, प्राप्तः for प्रोक्तः ; l. 17, समुच्छ्रितः for समन्वितः.

P. 32, l. 4, वा for च ; l. 5, वृत्रवतामिति for वृत्तिवतामपि ; l. 6, योक्तव्यो for नियुक्तो ; l. 9, अर्थार्जनादिज्ञानम् for अर्जनादिज्ञानम्.

P. 33, l. 1, अत्र चात्मोत्कर्षप्रकाशं for ब्राह्मणोत्कर्षप्रकाशनं ; l. 4, ज्ञानं शुचिः धृतिः for शौचं स्वधीर्घृणा ; l. 5, विनयमस्तेयम

for विज्ञानमास्तिक्यं ; l. 7, तपो for क्षमा ; l. 10, श्रुतं for श्रुतिः ; l. 12, केचित्तु ब्रुवते विद्या for कश्चिद्ब्रूते.

P. 34, l. 2, मेध्यमानवः for मेध्य एव सः ; l. 3, अग्निवत् for दैवतमपि ; l. 5, द्वितीयश्श्लोके for द्वितीयश्चैके ; l. 5, अननुवाक्या for अननूचाना ; l. 7, नानृग् ब्राह्मणो भवति न वणिक्कुशीलवः ; l. 8, न शूद्रप्रेषणं कुर्वन् ; l. 9, अव्रता for अब्राह्मणः ; यत्र भैक्ष्यचरा द्विजाः for भैक्षमात्रं चरेद्द्विजः ; l. 10, चोरभक्तप्रदो for चौरवृत्तिप्रदः ; l. 14, बहुयाज्यस्स्यात् for बहुयाज्यश्च.

P. 35, l. 1, पञ्चमस्तु हृतस्तेषां for पञ्चमस्त्वधिभूस्तेषां ; l. 7, ये च केचिदनाम्नायां for ये च केचन मानवाः ; l. 10, यमः for मनुः.

P. 36, l. 6, समं for शतम्.

P. 37, l. 3, षड्गुणं for अनन्तं ; l. 9, पुनः for स्मृतम् ; l. 10, 'दक्षः' omitted ; l. 11, substitutes व्यसनापहृणार्थं च कुटुम्बार्थं च याचते ; l. 13, संस्कारोद्वाहनादिभिः for संस्कारैः ब्राह्मणादिभिः ; l. 14, न तच्छ्रेयो for न तपः.

P. 38, l. 16, भिक्षमाणेभ्यः and इतरेभ्यः for भिक्षमाणेषु and इतरेषु.

P. 39, l. 4, सुब्राह्मण for स्वब्राह्मण ; l. 16, स्वदुहितृनामातरश्च after पात्रम् before पुरोहितः.

P. 40, l. 1, दानव्यासः for दाने व्यासः ; l. 13, गुणातिशयशालिनः for गुणातिशयेन.

P. 41, l. 2, omitted ; l. 5, भवन्त्येते for भवन्त्यर्थे ; l. 19, नास्ति मूर्खे व्यतिक्रमः for न मूर्खस्य व्यतिक्रमः.

P. 42, l. 4, यश्च for यथा ; l. 7, महद्वा for सहसा ; l. 10, द्विजेऽनृचे for द्विजे नरे ; l. 17, मुमूर्षूनपि गोपते for मूर्खानपि गोपते.

P. 43, l. 2–4, मूर्खातिक्रमे दोषता तस्य नास्ति मूर्खेभ्योऽतिक्रम इति व्यासादिभिरभिधानात् । सुमूर्खानिति सम्बन्धिदौहित्रादीनामेव विशेषणम् ; l. 13, तं तस्करमर्चयेत् for तं हि सुखमानयेत्.

P. 44, l. 5, द्रविगं तैव दातव्यं for द्रविणं तैर्न दातव्यं ; l. 10, दानविषयः for दानविशेषविषयः ; l. 13, उपरुन्धति for उपप्लवन्ति ; l. 15, omits पुनः सद्विप्रविषयः.

P. 45, l. 4, शौचहीनास्तु for शौचहीनाश्च ; l. 7, त्रिषु नाशो for वित्तनाशः ; l. 16, त्रिष्वत्येते तु यद्दत्तं for शिष्टेष्वेतेषु यद्दत्तम्.

P. 46, l. 4, मनुर्विष्णुश्च द्वितीयवर्ग्ये for मनुर्विष्णुश्च ; l. 10, बकव्रतधरो for बकवृत्तिधरः.

P. 47, l. 1, रक्षेत् for वक्ष्ये ; l. 6, गत्वा for मत्वा ; l. 6, प्रत्यायेत्तु यः पुनः for प्रणमेत हि यः पुनः ; l. 9, दानव्यासः for दाने व्यासः ; l. 12, युक्तः for मुक्तः ; l. 13, omits स्मृतिः.

P. 48, l. 1, त्रिपौरुषं for त्रिपूरुषम् ; l. 2, नाम for ज्ञेयो ; l. 5, मल्ले च for मत्ते च ; l. 6, चौरेषु for चौरेभ्यः; l. 10, reads—श्रीलक्ष्मीधरविरचिते कृत्यकल्पतरौ दानकाण्डे पात्रनिरूपणम्.

P. 50, l. 1, The following verses occur before तथा—

सर्वाण्येतानि कृतवान् पुरा शम्बरसूदनः ।
वासुदेवश्च भगवान् अम्बरीषश्च पार्थिवः ॥
कार्तवीर्यार्जुनो नाम प्रह्लादः पृथुरेव च ।
कुर्युरन्ये महीपालाः केचिच्च भरतादयः ॥

तथा—ll. 4, the sixth line (तस्मादाराध्य गोविन्दं) is brought up as line 4 and the fifth line (न शक्यमन्यथा) is omitted ; l. 12, पर्व for सर्वा ; l. 13, यज्ञोत्सव for यात्रोत्सव.

P. 51, l. 1, वस्तु for वसु ; l. 3, heading omitted ; l. 4, पुण्यं तिथिमथासाद्य ; l. 11, ब्रूयात् for कुर्यात् ; l. 12, इत्युक्तस्मरणात् for इत्यङ्गुलीसंयुक्तस्मरणात् ; शोभनानि द्वाराणि comes between भद्राणि and आननानि.

P. 52, l. 2, वेदी for वेदिः and कराथवा for कराश्रया ; l. 5, omitted ; l. 14, एतेषां for एते.

P. 53, l. 16, शालेङ्गुदी for शाकेङ्गुदी.

P. 54, l. 4, यथोत्तरङ्गं च तदङ्गमेव ; l. 7, समानजातिश्च for तदङ्गजातिश्च ; l. 12, अङ्गुलमानं for अङ्गुलिमानं ; l. 13, अङ्गुलमानं for अङ्गुलिमानं ; l. 14, नि(मि)नुयात् for लक्षयेत्.

P. 55, ll. 3–4, words in brackets supplied.

P. 56, l. 13, omits अष्टानां ; l. 14, वेदमन्त्रैः for मन्त्रवेदैः ; l. 15, वेदचतुष्टयसम्बन्धात्वमानां for वेदचतुष्टयसाध्यत्वाद्धोमानां ; l. 18, धूपम् for धूपान्.

P. 57, l. 6, तेजोवता लोकगणेन for तेजोबलाल्लोकगणेन ; l. 12, नमः for नः ; l. 16, शुभाधिनाथ for शुभादिनाथ.

P. 59, l. 9, मितप्रभावो for मितप्रभाव ; l. 10, रक्षाध्वरं for विशाध्वरं ; l. 15, मनवो for मुनयः.

P. 60, l. 2, omits इति ; l. 12, अनुमन्त्रयेत् for अनुवर्तयेत.

P. 61, l. 7, खड्गचर्मकवचः for चर्मकवचोपेतः ; l. 8, हैमं सूर्येण संयुतम् for हैमसूत्रेण संयुतम् ; adds सूर्येण हैमेनैव as explanation ; l. 14, साक्षिभूते for शक्तिभूते.

P. 62, l. 5, तेषामनुज्ञानं for तेषां अनुज्ञां च ; l. 6, विशिष्टादीन् for विशिष्टान् हि ; l. 9, तदनुज्ञाय for तदाज्ञया ; l. 10, inserts अपि after विशिष्टेभ्यः ; l. 10, अथ ब्राह्मणा for अब्राह्मणा ; l. 12, धारयेद्गेहे for धारयेद्देहे.

P. 63, l. 2, वसेत् for व्रजेत् ; l. 5, महीयते for स मोदते ; l. 14, इति तुलापुरुषदानविधानम् for इति तुलापुरुषदानविधिः ; l. 15, अथ हिरण्यगर्भदानम् for अथ हिरण्यगर्भदानविधिः.

P. 64, l. 4, वादनं for वाहनं ; l. 9, दात्रं सूची for दानसूची ; l. 15, पार्श्वयोः for पार्श्वतः ; l. 15, स्थापयेत्तद्वत् for स्थापयेद्धीमान्.

P. 66, l. 19, पुण्येऽह्नि विनिवेदयेत् for पुण्येऽहनि निवेदयेत्.

P. 67, l. 12, इति हिरण्यगर्भदानम् for इति हिरण्यगर्भदानविधिः.

P. 68, l. 2, शकलद्वयसंयुक्तं for कलशद्वयसंयुक्तं adds the explanation 'शकलद्वयसंयुक्तं' खण्डद्वयसंयुक्तम्.

P. 69, l. 7, त्रिः कृत्वा for दिक्कृत्वा.

P. 70, l. 3, होमं for देये ; l. 4, विधानयुक्ताः for विधानयुक्त्या ; l. 9, निर्धूतकल्मषविभुश्च तनुर्मुरारेः for the line.

P. 71, l. 9, कुर्यात् for कृत्वा ; l. 14, अर्धक्लृप्तसुवर्णस्य for ततस्तप्तसुवर्णेन.

P. 73, l. 6, पुरुषोऽव्ययः for पुरुषोत्तमः.

P. 74, l. 11, वा for च.

P. 75, l. 4, दशसहस्राधिकम् for दशसहस्रकम् ; l. 9, ताम्रदोह for कांस्यदोह.

P. 76, l. 13, मेऽग्रतः for ममाऽग्रतः

P. 77, l. 14, पुत्रपौत्रसमन्वितम् for राजराजो भवेन्नरः ; l. 15, omits तथा.

P. 78, l. 2, प्रदं श्रुतम् for प्रदर्शनात् ; l. 9, अनुभवति मदं वा for अनुभवति सुवासं ; l. 15, सर्वकामप्रदं for सर्वकामफलम्.

P. 79, l. 2, वेदिकाम् for वेदिकाः ; l. 8, विद्यां कृष्णाजिनं न्यस्य for वेद्यां कृष्णाजिनं न्यस्य.

P. 80, l. 1, कुस्तुम्बर for कुस्तुम्बुरु ; l. 3, घण्टामणित्रि for मणित्रि ; l. 5, कुस्तुम्बरु for कुस्तुम्बुरु ; l. 17, substitutes आसाह्निको भवदुःखमुपैति मर्त्यः.

P. 81, l. 3, वेदपुङ्गवः for वेदपुङ्गवैः ; l. 13, शय्यादिकं for सस्यादिकम्.

P. 83, l. 6, सकलकलुषमुक्तः for कलिकलुषविमुक्तः ; l. 8, पूज्यतो for पूजितः.

P. 84, l. 7, कूबरो युगधाराष्टकम्.

P. 85, l. 11, भवाभिधाय for भवाभवाय.

P. 86, l. 4, अखण्डमचण्डभानोः for अखण्डलचण्डभानोः; l. 8, प्रदानमेव for प्रदानमस्मिन् ; l. 11, इति हिरण्याश्वदानम् .

P. 87, l. 7, adds क्रीडार्थो रथः ; l. 11, असन् चन्दनैः for अशनचन्दनः ; l. 18, सुरूपतः for स्वरूपतः ; l. 19, कुर्यात्पञ्चपलादूर्ध्वं for कुर्यात्त्रिपलादूर्ध्वम् .

P, 88, l. 7, तस्मात् for यस्मात् ; l. 11, रथेऽधिरुढ for रथाधिरुढ.

P. 90, l. 1, सारदानुमयान् for सारदारुमयान् ; l. 8, खातिकावृतम् for खातकावृतम् ; वसति ग्रामसंज्ञिता for वसतिः ग्रामसंज्ञितैः ; l. 13, युक्तान् for युतान् ; l. 17, substitutes पर्जन्यादित्यरुद्रेभ्य इति विहितस्य पायसचरुप्रभृतेः होमतल्लिङ्गैः मन्त्रैः पलाशसहितं चाऽऽज्यं कृष्णतिलां तथा.

P. 91, l. 5, अभिपूजयेत् for प्रपूजयेत् ; l. 10, words in brackets missing.

P. 93, l. 6, मर्यादापर्वतवतं for मर्यादापर्वतवतीम् ; ll. 10–13. verses in brackets supplied ; l. 17, यथा for तथा.

P. 94, l. 12, अबले for अनघे.

P. 95, l. 11, सम्प्रार्थ्यमाणः for सन्तर्प्यमाणः ; l. 13, omits इति पृथिवीदानम्.

P. 96, l. 1, विश्वचक्रं तु कारयेत् for विषुवादिषु कारयेत् ; l. 2, ज्येष्ठं for श्रेष्ठं ; l. 5, भ्रमन्नेम्यष्टकावृतम् for रत्नकुम्भाष्टकावृतम् ; l. 10, बुधः for बुद्धः ; l. 18, ब्राह्मण्याद्याः for ब्रह्मण्याद्याः.

P. 97, l. 1, अन्तराणां मध्ये for अन्तरालानां मध्ये.

P. 98, l. 3, संख्यैः शिष्टैः for संघैः तिष्ठेत् ; l. 10, ससुदर्शनतां for असुदर्शनताम्.

P. 99, l. 14, शुभे for उभे.

P. 100, l. 15, उदीरयेत् for उदाहरेत्.

P. 102, l. 8, रत्निरङ्गुष्ठपूर्वाणि संख्यया त्वेकविंशतिः । तदर्धं प्रादेशः.

P. 103, l. 2, स च होमोऽधिकः सर्वशेषे कर्त्तव्यः ; l. 9, वसुभिश्च for पशुभिश्च.

P. 104, l. 8, अथ रत्नधेनुदानविधानम् ; l. 17, तद्वत् for सद्यः.

P. 105, l. 1, omitted ; l. 10, ते for च ; l. 12, परिकल्पयेत् for परिकल्पितम्.

P. 106, l. 6, विवचनां for विरचनां ; l. 12, युक्तां for युक्ते ; l. 16, पुण्यमाप्य.

P. 107, l. 5, रत्नधेनुप्रदानम् ; ll. 6–16, omitted.

P. 108, ll. 1–5, omitted.

P. 109, l. 5, सर्वभूतेश for सर्वभूतेषु ; l. 11, प्रजायते for अभिजायते ; l. 18, षोडशमहादानानि for दानकाण्डे षोडशमहादानपर्व.

P. 110, l. 1, पद्मपुराणे ब्रह्माण्डदानविधिः for पद्मपुराणोक्तं ब्रह्माण्डदानम् ; ll. 12–15, all words after लक्ष्म्या omitted.

P. 111, l. 9, यादसानि च for या वृषाणि ; l. 9, राजसान्येव for राजतानि च ; l. 9, adds अरण्यानि च सद्मानि सौवर्णानि तु कारयेत्.

P. 112, l. 1, चतुर्थाङ्ग for चतुर्दश ; l. 2, अहतविरसञ्छन्नाः for ईहितं चरमस्था च ; l. 10, जनार्दनः for जनार्दन ; l. 17, नराधिपः for नराधिप ; l. 23, भीमद्वादशौ for भीमद्वादशी.

P. 113, l. 2, सलोकताम् for सलोकता ; l. 3, इति ब्रह्माण्डदानम् ; l. 4, omitted ; l. 5, omits तत्र ; l. 12, सरसिजं for सदक्षिणम्.

P. 114, l. 8, पुनः for दिशम् ; l. 16, मुख्योदकहस्ताभ्यां for मुख्योदरसहस्ताभ्याम्.

P. 115, l. 5, दृष्टान्तार्थः for दृष्टान्तः ; l. 20, adds at the end क्षीरादिस्नपनप्रकारेण.

P. 116, l. 3, यं तु for जन्तु ; l. 6, इति त्रिःप्रकारं गोसहस्रदानम् ; l. 7, आदित्यपुराणे.

P. 117, l. 10, अनन्तं तस्य for अनन्तस्य ; l. 13, विप्रान् for गावः.

P. 118, l. 1, इति गोसहस्रदानम् before तथा ; l. 16, omitted ; l. 17, महाभारते.

P. 120, l. 13, heading omitted.

P. 121, l. 2, विवाहोत्सवयज्ञेषु ; ll. 9–11, omitted ; l. 13, comes after prose passage ; l. 14, omits पुंसः.

P. 122, l. 7, मुरारिः for पुरारिः.

P. 123, last line omitted.

P. 124, ll. 5–6, omitted up to गन्धमदनः.

P. 126, ll. 4–5, third and fourth quarters missing ; l. 13, शक्तितः for अथवा ; ll. 16–18, omitted.

P. 128, ll. 5–7 omitted ; l. 15, तस्मादन्तरसाः for यस्मादन्नरसाः ; l. 15, लवणाद्विताः for लवणं विना.

P. 129, l. 10, हेमवृक्ष for होमवृक्ष.

P. 130, l. 1, यथा for तथा ; l. 2, adds—यस्मात्सौभाग्यदायिन्यपात्रता तु गुड० ; l. 9, अथ सुवर्णाचलदानम् ; l. 12, यस्य प्रदानात् for यस्य प्रसादात् .

P. 131, l. 2, अवरः for अधमः ; l. 13, इति पर्वतदानम् for कनकाचलदानम् ; l. 14, अथ तिलशैलदानम्.

P. 132, l. 15, इति तिलपर्वतदानम् ; l. 16, अथ कार्पासाचलदानम् ; but the entire section is omitted upto घृताचलदानम् on p. 133.

P. 134, l. 10, in brackets, omitted.

P. 135, ll. 1–3, omitted ; l. 4, इति घृतपर्वतदानम्.

P. 136, l. 4, विसर्जनम् for विसर्जयेत् ; ll. 6–7, transposed ; l. 9, omitted ; l. 11, placed after line 14 ; l. 13, placed after lines 14 and 11.

P. 137, l. 4, द्विजोत्तमः for द्विजोत्तम ; l. 16, विभूषणैः for विलेपनैः.

P. 138, l. 6, इति रजतशैलदानम् ; l. 18, निवेशयेत् for निवेदयेत्.

P. 139, l. 9, विष्णुपुरं व्रजेत् for विष्णुप्रचोदितः.

P. 140, l. 1, जन्मार्बुदत्रयम् for जन्मायुतत्रयम् ; l. 4, सर्वतोपस्करान् for पर्वतोपस्करान् ; l. 10, पठ्यमानः for प्रठ्यमानैः ; l. 14, omitted ; ends thus : इति श्रीमल्लक्ष्मीधरविरचिते कल्पतरौ दानकाण्डे पर्वतदानानि.

P. 142, l. 13, श्रियः for श्रिये.

P. 143, l. 14, यथा श्राद्धं for यथा श्रद्धा.

P. 144, ll. 2–3 omits द्रव in द्रवद्रव्य and यत्र पद्मपुराणादौ एकैनैव घटेन घृतादिधेनुकथनं ; l. 9, omits तत्रैव ; l. 14, सर्वेषु for समेषु ; l. 15, given after l. 1, on p. 145.

P. 145, l. 4, षौडशाष्टमयी for षोडशाढमयी ; l. 8, ईदृशं for ईदृशीं ; l. 13, मन्त्रसूतां for मन्त्रमुक्त्वा.

P. 146, l. 9, इति पञ्चधेनुदानम्.

P. 147, l. 4, निर्कृणो for प्रयतो ; l. 7, देवं देवीं for देवदेवीं ; l. 8, विचित्रितैः for विचक्षणः ; l. 13, सुशोभनां for सुशोभितां ; l. 15, कम्बलः for कङ्कणं ; l. 17, चारुपत्रमयैः for चारुसूत्रमयौ ; l. 19, समर्पयेत् for समर्चयेत् ; l. 20, विभूषितम् for विभूषणाम्.

P. 148, l. 3, यावन्ति for यावांश्च ; l. 6, अविचारणात् for अविचारतः; l. 8, adds इहैव तेजसा युक्तो वसुपुत्रसुखान्वितः । पुनर्दैव्यां रतो नित्यं पूजयेत् विधिना च तम् ; ll. 11–12, omitted ; l. 17, गन्धस्य सर्पिषा for गन्धस्य सर्पिषः.

P. 149, l. 6, अगुरु for अगरु ; l. 12, मङ्गला शास्त्रपारगे for सर्पिषा धेनुरुत्तमा ; l. 14, चर्चिका उमा for चर्चिता तु सा ; l. 15, नन्दां मनोनुगाम् for मन्त्रमनोनुगाम् ; l. 17, अमुना for शुभा.

P. 150, l. 4, विंशकम् for विंशतिम् ; l. 6, धेनोस्तावदुदाहृता for येनोक्ता बहुधा कृता ; l. 8, omits देवीपुराणोक्तं ; l. 9, omitted. l. 13, शङ्ख for क्षीर.

P. 151, l. 1, विधानेनोपकल्पयेत् for धान्यानां च प्रकल्पयैत् ; l. 6, शुभदे for सभगे ; l. 8, शिवा for शुभा ; l. 12, प्रपां सभां तडागं च कूपं वाऽपि सुपुष्कलम् ; ll. 13–14, substitutes, like Hēmādri, p. 401, कृत्वा कुम्भान् सुवर्णांश्च गन्धमाल्यैरलङ्कृताम्। 'प्रपा' पानीयशाला। 'शाला' सभाजनसमाश्रया।'सुवर्णान्' शोभनवर्णान् .

P. 152, l. 3, कामदः कामदानाय for कामदा मम कामाय ; ll. 8–9 omitted; l. 13, omitted.

P. 153, l. 1, तिलैराकीर्य for तिलैरापूर्य ; l. 4, प्रयच्छेद्यः for प्रयच्छंस्तु ; l. 6, तावत्कोटि for तिलकोटि ; l. 11, कारण for काञ्चन.

P. 154, l. l. 8–10, omitted ; l. 11, adds 'कांस्योपधानसंयुक्तं' कांसपात्रपिहितम्.

P. 155, l. 17, स पुण्येषु प्रमोदते for मोदते त्रिदशैः सह.

P. 156, l. 7, देवाग्रे for देवाय ; l. 10, अपारधाद्धिशाम्नेयं ?

P. 157, l. 5, adds भानुरुवाच ; l. 12, वस्त्रोपशोभितम् for वस्त्रोपवीतिनम् ; l. 13, दर्भविष्टरसंयुतम् for यानं विष्णुरथे स्थितम्.

P. 158, l. 7, रोमतुल्यानि for रोमसंख्यानि ; adds यमः before रुक्मशृङ्गीं on l. 18, and दक्षः before दत्त्वा द्विजेन्द्राय on l. 20.

P. 159, l. 1, omitted ; l. 7, omits यो दान्तं वृषभं ददाति स च ; l. 10, जाबालः for जाबालिः ; l. 11, अयाचितम् for यथाविधि l. 13, देवीपुराणे for वायुपुराणे ; ll. 15–18, omitted.

P. 160, l. 1, omitted l. 14, तावदब्दानि वसति for तावदब्दसहस्राणि

P. 161, l. 17, मातृकं पितृकं च यत् for पापं मातृकं भवेत् ; l. 18, जलधृतस्य हस्तेऽस्य for यश्च जन्मशतैस्तस्य.

P. 162, l. 6, प्राज्ञो for प्रोक्तो l. 10, अग्निनेवेन्धनम् for आसप्तमं कुलम् ; l. 17, शोभिताम् for संयुताम्.

P. 163, l. 5, कपिलागोदानमाहात्म्यम् before महाभारते ; l. 9, omitted ; l. 14, शबला शर्करा ; l. 15, adds सुव्रतां वस्त्रसंवीतामग्निलोके महीयते ; l. 18, धूसरवर्णा for धूम्रवर्णा.

P. 164, l. 3, कांस्यदोहनाम् for गां पयस्विनीम् ; वारुणं for कौवेरं ; l. 15, सुव्रतां for सुवस्त्राम.

P. 165, l. 2, सर्वरत्न for वस्त्रवत्स ; l. 22, यथाऽमरः for यथा नरः.

P. 166, l. 3, omitted ; l. 14, omitted.

P. 167, Last three lines and the first four on the next page are omitted.

P. 170, l. 1, omitted ; l. 5, स तैः for सह.

P. 171, ll. 5–6, omitted ; l. 8, विद्धिकौशिक for वृद्धकौशिकाः.

P. 172, l. 1, तथा omitted ; सबले for समङ्के.

P. 173, ll. 12–13, omitted.

P. 174, l. 7, कर्मोपवाह्यः for कर्मोपवत्यः.

P. 175, l. 10, शीली for शाक्ती ; l. 14, दान्तवृषः for दान्तबुद्धिः ; 'वसु' धनं ; l. 15, उषसि ऊढा आवाहयिता गायत्र्या इत्यर्थः.

P. 176, l. 18, omitted ; Ms. roughly confirms text.

P. 177, l. 8, and l. 14, शिवभावने for शिवभाविने.

P. 178, l. 3, साधुवाहिनम् for साधुवाहनम्.

P. 179, l. 4, prefixes तथा

P. 180, l. 18, कृष्णमार्जकम् for कृष्णमार्गणम्.

P. 184, l. 2, कुलदेव for बलो देवः.

P. 185, l. 16, पूज्ययुग्मेन for सूक्ष्मसूत्रेण.

